http://www.ukboardonline.com

रोल नं. | | | | | | | | |

मुद्रित पृष्ठों की संख्या : 7

028

228 (HUF)

# 2019

# संस्कृतम्

## (केवल प्रश्नपत्रम्)

**अवधि : होरात्रयम् ]** **[ पूर्णांक : 100**

**निर्देश :** (i) अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।
(ii) उत्तराणि पृथक् प्रदत्तायाम् उत्तरपुस्तिकायां लेखनीयानि।
(iii) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि क्रमेण एकस्मिन् स्थाने लेखनीयानि।
(iv) प्रश्नपत्रे उत्तराणि न लेखनीयानि।
(v) प्रश्न संख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।
(vi) खण्डसंख्या अपि लेखनीया।

### खण्ड - 'क' (अपठितांश-अवबोधनम्)

1. अधोलिखितम् अनुच्छेदं पठित्वा अनुच्छेदाधारितान् प्रश्नान् उत्तरत–

'मातरः सर्वभूतानां, गावः सर्वसुखप्रदाः' उक्तकथनं गो श्रेष्ठतां प्रतिपादयति। वस्तुतस्तु गौः अस्माकं माता अस्ति। यतः गौः स्वामृतोपमेन दुग्धेन मातृवत् अस्मान् पालयति। गौराकृतिः अति सरला मनोहरा च भवति। गोमूत्रपानेन उदररोगाः नश्यन्ति। अस्माभिः गोपालनं गोरक्षणम् च कर्त्तव्यम्। उक्तं च-गावो ममाग्रतः सन्तु, गावो मे सन्तु पृष्ठतः।

(क) एक पदेन उत्तरत– 1×2=2
  (i) सर्वसुखप्रदाः काः?
  (ii) गौः कीदृशेन दुग्धेन अस्मान् पालयति?

(ख) पूर्णवाक्येन उत्तरत– 1
  (i) सर्वभूतानां मातरः काः प्रोक्ताः?

(ग) निर्देशानुसारम् उत्तरत- 1×2=2
  (i) 'गौः' इत्यस्य शब्दस्य एकं पर्यायशब्दं लिखत।
  (ii) 'गौराकृतिः' इत्यस्मिन् शब्दे सन्धि-विच्छेदं कुरुत।

2. अधोलिखितम् अनुच्छेदं पठित्वा अनुच्छेदाधारितान् प्रश्नान् उत्तरत–

महामनस्विनः मदनमोहनमालवीयस्य जन्म प्रयागनगरे एकस्मिन् प्रतिष्ठितकुलेऽभवत्। तस्य पिता संस्कृतस्य विद्वान् आसीत्। मालवीयः प्रयागे एव शिक्षां प्राप्य अत्रैव राजकीय विद्यालये अध्यापनं प्रारब्धवान्। युवकः मालवीयः स्वकीयेन प्रभावपूर्ण-भाषणेन जनानां मनांसि अमोहयत्। कालान्तरे सः विधि-परीक्षामुत्तीर्य प्रयागस्थे उच्चन्यायालये प्राड्विवाक कर्म कर्तुमारभत्। महामना विद्वान् वक्ता, धार्मिको नेता, पटुपत्रकारश्चासीत्।



http://www.ukboardonline.com

http://www.ukboardonline.com

http://www.ukboardonline.com

http://www.ukboardonline.com

(क) एक पदेन उत्तरत - 1×2=2

(i) मदनमोहनमालवीयस्य जन्म कुत्र अभवत् ?

(ii) युवकः मालवीयः कथं जनानां मनांसि अमोहयत् ?

(ख) पूर्णवाक्येन उत्तरत- 2×2=4

(i) मालवीयः अध्यापनं कुत्र प्रारब्धवान् ?

(ii) कालान्तरे सः किं कर्तुमारभत्?

(ग) यथानिर्देशं उत्तरत- 1×2=2

(i) 'अत्रैव' इत्यस्मिन् शब्दे का सन्धिः वर्तते ?

(ii) 'मालवीयः जनानां मनांसि अमोहयत्।'
अस्मिन् वाक्ये क्रियापदं किम् ?

(घ) अस्य गद्यांशस्य उपयुक्तं शीर्षकं लिखत। 2

**खण्ड - 'ख' (रचनात्मकं लेखनम्)**

3. विगतमासे युष्माकं विद्यालये पर्यावरणदिवसः समायोजितः। अस्य आयोजनस्य उल्लेखं कुर्वन् एकं संक्षिप्तपत्रं मञ्जूषायां प्रदत्तैः शब्दैः पूरयित्वा स्वमित्रं लिखत- 1×5=5

प्रिय मित्र राकेश!

नमस्ते।

विगत जून मासस्य (i).........तारिकायां अस्माकं विद्यालये पर्यावरणदिवसस्य (ii)......... अभवत्। अस्मिन् आयोजने (iii) ........गुरवः छात्राश्च उपस्थिताः आसन्। पर्यावरणविषयमधिकृत्य (iv)...... स्वरचितं काव्यपाठं कृतम्। सुरुचिकरं काव्यपाठं श्रुत्वा सर्वे (v)........ मां प्रशंसितवन्तः। अग्रे तव कुशलं इच्छामि।

भवतां मित्रम्
मञ्जुलः

| **मञ्जूषा** - आयोजनम्, | पञ्चम, | श्रोतारः, | सर्वे, | मया |
|---|---|---|---|---|

4. मञ्जूषातः शब्दचयनं कृत्वा निम्नांकितं संवादं पूरयत– 1×5=5

राघवः-भारतम् अस्माकं राष्ट्रम्, ..........सर्वे भारतीयाः।

रमा -शोभनम्,...........इयं भारतभूमिः।

राघवः-............ मुकुटरिव शोभते।

रमा -सागरः ........... चरणौ प्रक्षालयति।

राघवः-धन्याः वयम् .............।

| **मञ्जूषा** - स्वर्गतुल्या, | हिमालयः, | वयं, | भारतीयाः, | अस्याः |
|---|---|---|---|---|



http://www.ukboardonline.com

http://www.ukboardonline.com

http://www.ukboardonline.com

http://www.ukboardonline.com

5. 'अस्माकं विद्यालयः' इति विषयम् अधिकृत्य पञ्चवाक्येषु एकं अनुच्छेदं लिखत। सहायतार्थं शब्दाः मञ्जूषायां दत्ताः – 2×5=10

| **मञ्जूषा** - नगरे/ग्रामे, छात्राः, भवनम्, अध्यापकाः, शोभते, परितः, पुष्पवाटिका, क्रीडाक्षेत्रम् |
|---|

**खण्ड - 'ग' (अनुप्रयुक्त व्याकरणम्)**

6. अधोलिखितेषु रेखाङ्कित पदेषु सन्धि/सन्धि-विच्छेदं कृत्वा उत्तरपुस्तिकायां लिखत- 1×3=3

(क) गृह + अभिमुखाः सर्वे छात्राः।

(ख) रामोऽहं व्याकुलात्मा।

(ग) अतीव सुन्दरम् इदं भवनम् ।

7. निम्नांकित रेखांकित पदेषु समासं/ समास विग्रहं कृत्वा लिखत– 1×4=4

(क) राजमार्गेषु शोभनाःपादपाः सन्ति।

(ख) छात्राः यथास्थानं गच्छन्ति।

(ग) सीता च रामश्च वनम् अगच्छताम्।

(घ) बालकः पीताम्बरं पश्यति।

8. रेखाङ्कितपदेषु प्रकृति-प्रत्ययौ संयोज्य वाक्यानि उत्तरपुस्तिकायां लिखत- 1×5=5

(क) मया ग्रन्थः पठ् + क्त।

(ख) अज + टाप् जलं पिबति।

(ग) जलं पा + क्त्वा सः गृहं गच्छति।

(घ) इदं पुस्तकं पठ् + अनीयर् अस्ति।

(ङ) सः बुद्धि + मतुप् जनः अस्ति।

9. मञ्जूषायाः सहायतया निम्नाङ्कित वाक्यानि अव्यय शब्दैः पूरयित्वा लिखत- 1×5=5

(क) अश्वः – – धावति।

(ख) बालकः – – – गीतं गायति।

(ग) – – – कर्त्तव्यपालनम् करणीयम् ।

(घ) यत् मया अभिलषितं – – प्राप्तम्।

(ङ) सा – – – देवान् अर्चयति।

| **मञ्जूषा** : तत्, मन्दं-मन्दं, तीव्रं, अवश्यमेव, प्रतिदिनम् |
|---|

10. अधोलिखितवाक्यानां वाच्यपरिवर्तनं कृत्वा उत्तरपुस्तिकायां लिखत – 1×3=3

(क) छात्रः पत्रं लिखति।

(ख) सा दानं ददाति।

(ग) मया तत्र गम्यते।



http://www.ukboardonline.com
http://www.ukboardonline.com
http://www.ukboardonline.com

http://www.ukboardonline.com

11. घटिकां दृष्ट्वा शब्देषु लिखत, राधा कदा किं करोति? 1×4=4

(क)  (ख)  (ग)  (घ) 

9:00 बजे | 4:45 बजे | 5:15 बजे | 10:30 बजे

(क) राधा प्रातः ..........वादने विद्यालयं गच्छति।

(ख) सा अपराह्न ......... वादने विद्यालयात् गृहम् आगच्छति।

(ग) राधा सायं .......... वादने जलपानं करोति।

(घ) रात्रौ ..........वादने सा शयनाय गच्छति।

12. अधोलिखितवाक्ययोः अङ्कानां स्थाने संख्यावाचक विशेषणेन रिक्तस्थानपूर्तिं कृत्वा लिखत– 1×2=2

(क) अस्माकं विद्यालये (21) ...........अध्यापकाः सन्ति।

(ख) मम कक्षायां (50)..........छात्राः पठन्ति।

13. अधोलिखितेषु वाक्येषु रेखांकित-पदानि शुद्धानि कृत्वा पूर्णवाक्यम् उत्तरपुस्तिकायां लिखत– 1×4=4

(क) आकाशे सूर्यः उदयतः। http://www.ukboardonline.com

(ख) अहं ग्रामम् अगच्छाम् ।

(ग) वाटिकायां सर्वे पुष्पाणि विकसन्ति।

(घ) गावः दुग्धं ददाति।

## खण्ड - 'घ' (पठित-अवबोधनम्)

14. अधोलिखितं गद्यांशं पठित्वा तत् आधारितान् प्रश्नान् उत्तरत–

विचित्रा दैवगतिः। तस्यामेव रात्रौ तस्मिन् गृहे कश्चन चौरः गृहाभ्यन्तरं प्रविष्टः। तत्र निहितमेकां मञ्जूषाम् आदाय पलायितः। चौरस्य पादध्वनिना प्रबुद्धोऽतिथिः चौरशङ्कया तमन्वधावत् अगृह्णाच्च, परं विचित्रमघटत। चौरः उच्चैः क्रोशितुमारभत "चौरोऽयं चौरोऽयम्" इति।

(क) एक पदेन उत्तरत– 1

(i) चौरः कुत्र प्रविष्टः?

(ख) पूर्णवाक्येन उत्तरत– 1×2=2

(i) मञ्जूषाम् आदाय कः पलायितः?

(ii) चौरः उच्चैः किं क्रोशितुमारभत?



http://www.ukboardonline.com

http://www.ukboardonline.com

http://www.ukboardonline.com

http://www.ukboardonline.com

(ग) यथानिर्देशम् उत्तरत– 1×2=2

(i) 'अभ्यन्तरम्' इत्यस्मिन् पदे सन्धिविच्छेदं कुरूत।

(ii) 'प्रबुद्धोऽतिथिः' अस्मिन् पदे विशेषणपदं किम्?

15. अधोलिखितं श्लोकं पठित्वा प्रश्नान् उत्तरत–

गुणी गुणं वेत्ति न वेत्ति निर्गुणो,
बली बलं वेत्ति न वेत्ति निर्बलः।
पिको वसन्तस्य गुणं न वायसः,
करी च सिंहस्य बलं न मूषकः।।

(क) एक पदेन उत्तरत- 1

(i) कस्यापि बलं कः वेत्ति?

(ख) पूर्ण वाक्येन उत्तरत- 1×2=2

(i) पिको कस्य गुणं वेत्ति?

(ii) मूषकः कस्य बलं न वेत्ति?

(ग) यथानिर्देशम् उत्तरत- 1×2=2

(i) 'करी' इत्यस्य पदस्य पर्यायपदं लिखत।

(ii) 'पिको वसन्तस्य गुणं न वायसः' अत्र अन्तर्निहितं क्रियापदं किम् ?

16. अधोलिखितं नाट्यांशं पठित्वा प्रश्नान् उत्तरत-

रामः - अहो! उदात्तरम्यः समुदाचारः ।
किं नामधेयो भवतोर्गुरुः ?

लवः - ननु भगवान् वाल्मीकिः।

रामः - केन सम्बन्धेन?

लवः - उपनयनोपदेशेन।

रामः - अहमत्र भवतोः जनकं नामतो वेदितुमिच्छामि।

लवः - न हि जानाम्यस्य नामधेयम् ।
न कश्चिदस्मिन् तपोवने तस्य नाम व्यवहरति।

रामः - अहो माहात्म्यम् ।

कुशः - जानाम्यहं तस्य नामधेयम् ।

रामः - कथ्यताम् ।

कुशः - निरनुक्रोशो नाम .....

रामः - वयस्य, अपूर्वं खलु नामधेयम् ।

http://www.ukboardonline.com
http://www.ukboardonline.com



http://www.ukboardonline.com

http://www.ukboardonline.com

(क) एक पदेन उत्तरत- 1

(i) समुदाचारः कीदृशः भवति?

(ख) पूर्ण वाक्येन उत्तरत– 1×2=2

(i) भगवान् वाल्मीकिः केन सम्बन्धेन लवकुशयोः गुरुः ?

(ii) लवकुशयोः जनकं नामतो कः वेदितुमिच्छति?

(ग) निर्देशानुसारं उत्तरत - 1×2=2

(i) 'उपनयनोपदेशेन' इत्यस्मिन् पदे सन्धि-विच्छेदम् कुरूत।

(ii) 'भवतोः' सर्वनाम पदस्थाने संज्ञापदं लिखत।

17. अधोलिखितश्लोकयोः भावार्थं उपयुक्तपदैः पूरयित्वा लिखत-

(क) आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः।
नास्त्युद्यमसमो बन्धुः कृत्वायं नावसीदति।। 1×3=3

**भावार्थः** – आलस्यं मनुष्याणां (i)..........वर्तते।
तस्मात् आलस्यं सर्वथा (ii) ......।
सुखमय जीवन निर्वहनाय उद्यमः (iii)........।

(ख) एक एव खगो मानी, वने वसति चातकः।
पिपासितो वा म्रियते, याचते वा पुरन्दरम् ।। 1×3=3

**भावार्थः** – एक एव (i) ..........वने वसति।
चातकः (ii) ........म्रियते।
(iii)..........याचते।

18. अधोलिखित श्लोकयोः अन्वयं पूरयित्वा उत्तरपुस्तिकायां लिखत-

(क) दुष्कराण्यपि कर्माणि मतिवैभवशालिनः।
नीतिं युक्तिं समालम्ब्य लीलयैव प्रकुर्वते।। ½×3=1½

**अन्वयः** – मतिवैभवशालिनः (i) --------कर्माणि नीतिं युक्तिं
(ii) -------लीलयैव (iii)---------- ।

(ख) सम्पत्तौ च विपत्तौ च महतामेक रूपता।
उदये सविता रक्तो रक्तःश्चास्तमये तथा।। ½×3=1½

**अन्वयः** –
(i).........सम्पत्तौ विपत्तौ च एकरूपता (भवति)।
(ii).........उदये रक्तः तथा (iii) .......च रक्तः (भवति)



http://www.ukboardonline.com

http://www.ukboardonline.com

http://www.ukboardonline.com

http://www.ukboardonline.com

19. रेखाङ्कितपदमाधृत्य प्रश्ननिर्माणं कृत्वा उत्तरपुस्तिकायां लिखत– 1×4=4

(क) वाल्मीकिः कुशलवयोः गुरुः आसीत् ।

(ख) व्यायामात् आरोग्यम् उपजायते।

(ग) त्वम् मानुषात् विभेषि।

(घ) तृणानां अग्निना सह विरोधो भवति।

20. अधोलिखितानि वाक्यानि घटना क्रमेण संयोज्य पुनः उत्तरपुस्तिकायां लिखत- ½×8=4

(i) अस्मिन् चौर्याभियोगे त्वं वर्षत्रयस्य कारादण्डं लप्स्यसे" इति प्रोच्य उच्चैः अहसत् ।

(ii) तस्य मृत शरीरं राजमार्गं निकषा वर्तते।

(iii) स भारवेदनया क्रन्दतिस्म।

(iv) न्यायाधीशः आरक्षिणम् अभियुक्तं च तं शवं न्यायालये आनेतुमादिष्टवान्।

(v) यथा कथञ्चिद् उभौ शवमानीय एकस्मिन् चत्वरे, स्थापितवन्तौ।

(vi) आरक्षी सुपुष्ट देह आसीत्, अभियुक्तश्च अतीव कृशकायः।

(vii) आदेशं प्राप्य उभौ प्राचलताम्।

(viii) क्रोशद्वयान्तराले कश्चिज्जनः केनापि हतः।

21. निम्नांकित शब्दानां संस्कृतेन वाक्यप्रयोगं कुरुत– 1×3=3

(क) हिमकरः

(ख) वैज्ञानिकाः

(ग) निवसन्ति

*****

http://www.ukboardonline.com
Whatsapp @ 9300930012
Send your old paper & get 10/-
अपने पुराने पेपर्स भेजे और 10 रुपये पार्ये,
Paytm or Google Pay से



http://www.ukboardonline.com

http://www.ukboardonline.com

http://www.ukboardonline.com